Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(7), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# शैवागमोक्तपवित्रोत्सवविचारः

**डा.पवन् वंशी श्री चावलि**
अध्यापकः, आगमविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**आगतं शिववक्त्रेभ्यः गतं च गिरिजा मुखे ।**
**मतं च वासुदेवन तस्मादागममुच्यते ।।**

आगत- गत- मत इति त्रयाणां शब्दानां आद्यक्षरसम्मेलनमेव आगम इति, सर्वेषु दर्शनग्रन्थेषु आगमदर्शनमेव भगवतः परमात्मनः साकारकल्पनम् उपदिष्टं भवतीति सार्वजनिनोऽयमंशः।

देवताप्राधान्येन आगमाः नैकविधाः सन्ति। परमशिव एव प्रधानदेवः शिवास्यार्चनमेव कैलासप्राप्तिः परमशिवस्य मन्दिरनिर्माणमेव मुक्तेः मार्गभूतं, पञ्चाक्षरीमन्त्रजप एव मुक्तेः साधन इति शैवागमस्य सिद्धान्तो वर्तते।

आगमाः नैकविधाः सन्त्यपि वेदमन्त्रैः निर्दिष्टः वैदिकमार्गेपेतः श्रुतिमन्त्रैः समन्वितः विशिष्टतत्त्वप्रबोधकः अत्यन्तं प्राचीनतमः शैवागमः भवतीति शैवागमविदुषामभिप्रायः।

निराकारस्य परमशिवस्य साकारं मन्दिरे प्रतिष्ठाप्य तत्र तस्य साकारसदृशं विविधैः द्रव्यैः परिकल्पितं विशिष्टं लिङ्गं सुसंस्थाप्य अनुदिनम् अभिषेक- अर्चन- उत्सव- प्रदोषपूजादिभिः तस्मिन् लिङ्गे वैदिक्या पद्धत्या शक्तिं सुसंसाध्य सर्वजनहितार्थाय लोकक्षेमाय प्रार्थनां कुर्वन्ति मन्त्रज्ञाः शैवदीक्षातत्पराः।

अनुदिनं कृतार्चनोत्सवकर्मसु ज्ञाताज्ञात द्रव्य- मन्त्र- तन्त्र- मुद्रादिषु सम्भूताः ये दोषाः सन्ति तेषां दोषाणां निवारणरूपद्वारा सम्पूर्णार्चनासाफल्यतासंसाधरनार्थम् उपदिष्टः उत्सवः पवित्रोत्सवः भवेत्। अयं नित्यरूपः।

अस्य नित्यस्वरूपस्य पवित्रोत्सवस्य प्राधान्यता कीदृशी? पवित्रोत्सव स्वरूपं कथमुपदिष्टम्? उत्सवाङ्गभूताः क्रियाः काः? इत्येतान् अंशान् यथामति शैवागमवाङ्मये प्रसिद्धविदुषा श्रीमता निगमज्ञानदेशिकशिवाचार्येण उपदिष्टस्य **शैवकालविवेकः** इति ग्रन्थमधारीकृत्य शोधपत्रं प्रस्तोतुमिच्छाम्यहम्।

पत्रेऽस्मिन् पवित्रशब्दार्थः पवित्रोत्सवावश्यकता पवित्रोत्वस्य नित्यत्वं पवित्रोत्वकालः पवित्रोत्सवप्रयोगक्रमः इत्येतान् अंशान् यथामति समालोचितुमिच्छामि।

**पवित्रशब्दार्थः**

**“पूञ् पवने”** इत्यस्मात् धातोः **पुवः संज्ञायाम् इति** पाणिनी सूत्रात्[1] पू+इत्र प्रत्ययेन पवित्रशब्दः निष्पन्नः जातः। **पूयते पवित्रीक्रियते अनेन** कर्मणा इति पवित्रशब्दस्य विशिष्टः अर्थः द्योतते। **पविभ्यः दोषेभ्यः**

1. अष्टाध्यायी 3-2-185

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(7), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**वज्रसमानसदृशेभ्यः अपि त्रायते रक्षां क्रियते इति** विशेषार्थः उपदिष्टः अत्र। पविः वज्रं **कुलिशं भिदुरं पविः**[2] पवेः नित्यपूजा वैकल्यदोषात् जनितात् नरकात् त्रायत इति पवित्रम्।

**सन्त्रायते यन्नरकात्पुमांसं वज्राभिधानाच्च ततः ततः पवित्रम्**[3] **।**

इति पवित्रशब्दस्य निर्वचनानि नैकानि उपदिष्टानि आसन् शैवकालविवेकग्रन्थे।

**पवित्रोत्सवावश्यकता**

पवित्रधारणया सह कृतः उत्सवः पवित्रोत्सवः।

पवित्रोत्सवः देवालयेषु आचर्यते विशेषः उत्सवः। अस्य उत्सवस्य प्रयोजनं देवतायाः शक्तिसंसाधनार्थं भक्तानां पुण्यवृद्ध्यर्थं च भवति।

परमशिवस्य आलये प्रचलितासु नित्य - नैमित्तिक- काम्य पूजासु नित्योत्सव- पक्षोत्सव- मासोत्सव- अयनोत्सव- संवत्सरोत्सवेषु उपचारदोषाः द्रव्यदोषाः क्रियादोषाः आचार्यसङ्करदोषाः भक्तदोषाः भक्तिदोषाः ये सम्भवन्ति तेषां दोषनां निवारणारूपः सम्पूर्णक्रिया साधनरूपः शक्त्यभिवृद्ध्यर्थं क्रियारूपः असौ अवश्यं आचरणीयः भवतु इति अयं उत्सवः नित्योत्सवः भवेदिति च शैवकालविवेकग्रन्थे स्पष्टमुपदिष्यते।

अयं पवित्रोत्सवः अवश्यं देवालयेष्वेव कर्तव्यः। पवित्रत्वसाधनाय मूर्तीनां दिव्याद्भुततेजः संसाधनाय भक्ताः पुण्यप्रवृद्धि संसाधनाय च असौ कर्तव्यः भवेदिति निगमज्ञानदेशिकशिवाचार्येण विव्रियते शैवकालविवेकग्रन्थे।

**पवित्रोत्सवस्य नित्यत्वम्**

**नित्यं काम्यं केपि नैमित्तिकं च प्रायश्चित्तं तद्विधेः पूरणं च।**
**इत्थं पाहुर्देशिकाश्चाभियुक्ताः नित्याङ्गत्वान्नित्यमेतत्पवित्रम्**[4]**।।**

भगवतः अनुष्ठीयमनोत्सवाः सर्वेऽपि अवश्यं अनुष्ठेयाः। तत्र केचन उत्सवाः भक्तस्य भावनानुसारं द्रव्यं मनसि निधाय अनुष्ठेयाः। केचन उत्सवाः तिथि- वार- नक्षत्रमनुसृत्य आचरणीयाः भवन्तु, तर्हि नित्यार्चनं वैदिक्या पद्दत्या अवश्यं कर्तव्यम्। नित्यार्चने दोषाणां परिहारः अवश्यं साधनीयः नित्यनैमित्तिकादि उत्सवेषु दोषाणां निवारणरूप एव अयं पवित्रोत्सवः। अत एव असौ नित्यत्वेन गण्यते। भगवतः यत्र कुत्रापि यदा कदापि येन केन मार्गेणापि आगमपद्धत्या वैदिकमार्गेणापि अर्चनं करणीयम्। ज्ञाताज्ञातदोषाणां निवारणमपि अवश्यं संसाधनीयम्। अनेन पवित्रोत्सवेन भगवान् आनन्दतुन्दिलो भवति साकारस्वरूपस्य उद्देश्यमपि सफलं भवेत्। आचार्य- अर्चक- यजमान- अधिकारजनास्सर्वेऽपि अस्य पवित्रोत्सवस्य नित्यत्वं मनसि निधाय प्रवर्तितव्यम्। यदा कदापि भगवतः अर्चनं दोषभूयिष्टं माभूदिति उपदेशसारः।

---

2. अमरकोशः 1, स्वर्गवर्गः 47श्लो

3. शैवकालविवेकः 80पृ

4. शैवकालविवेकः 80पृ

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(7), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

अयं पवित्रोत्सवः नित्यमाचरणीयमिति कृत्वा नित्यमिति कामनया अनुष्ठेयमानमिति कृत्वा काम्यमिति, निमित्ततया कर्तव्यमिति नैमित्तिकमिति, संवत्सरे विद्यमान दोषनिवृत्यर्थं कर्तव्यमिति कृत्वा प्रायश्चित्तमिति, उक्तकालेषु अवश्यं (विधेः पूरणार्थं) कर्तव्यमिति कृत्वा विधिच्छिद्रपूरणमिति नामान्तराणि वदन्ति। तर्हि नित्याङ्गपक्षत्वं साधु इति परिहारः उक्तः।

**नित्य- नैमित्तिक- काम्य- प्रायश्चित्तकर्माणि**

**स्नानं पूजा जपो होमो**
**ध्यानं चैव तु पञ्चमम्[5]।**
**एवं नित्यं सदा कुर्यात् ।।**

भगवतः साकारस्य अनुष्ठीयमानकर्मसु स्नान- पूजा- जप- होम- ध्यानानि नित्यकर्माणि भवन्ति।

**यावज्जीवं दर्शपूर्णमासाभ्यां यजेत[6]**

दर्शपूर्णमासेष्टिः चातुर्मास्यव्रतं इत्यादीनां नित्यविधिविशिष्टत्वेन नित्यत्वं[7] साधयन्ति।

**दीक्षा चैव प्रतिष्ठा च नैमित्तिकमिदं द्विधा[8]।**

दीक्षा- प्रतिष्ठा इति द्वौ अंशौ नैमित्तिक[9]कर्मसु अन्तर्भूतौ भवतः। षट् सहस्त्रकालोत्तरागमवचनात् दीक्षाप्रतिष्ठौ द्वौ निमित्तकर्म भवतः[10]। सन्ध्यावन्दनादयः कालनिमित्तत्वात् नैमित्तिकम्।

अणिमादयः वशीकर्तुं कर्म यदस्ति तत् काम्यम् इति वक्तव्यम्। यजमानः आत्मोन्नति साधनार्थं अणिमादि ऐश्वर्यानां वशीकर्तुं भगवतः पूजा या उद्दिष्टा सा काम्या भवति।

प्रायश्चित्तमिति क्रियाविशेषः। कश्चन पुरुषः प्रमादवशात् अज्ञानात् यत् किञ्चित् दोषपूर्णं कर्म करोति, तस्य कर्मणः फलरूपेण पापं सम्भवति। तस्य पापस्य निवारणार्थं यत् कर्म विधीयते तत् प्रायश्चित्तमिति कथ्यते। प्रायश्चित्तेन मनः शुद्धिः आत्मशुद्धिः च भवति।

प्रायश्चित्तं तावत् अर्चनोत्सवप्रतिष्ठास्नपनादौ क्रियावैकल्यदोषाः सम्भवति चेत् सद्यः तत्रैव प्रायश्चित्तं आचरणीयम्।

पवित्रोत्सवः आषाढादि कालनिर्णयविधित्वात् प्रायश्चित्ते नान्तर्भवति।

---

[5]. शैवकालविवेकः 81पृ

[6]. जैमिनीयन्यायमाला 3.3. 13

[7]. **नियतनिमित्तम् नित्यम्**

[8]. शैवकालविवेकः 81पृ

[9]. **अनियतनिमित्तम् नैमित्तिकम्**

[10]. शैवकालविवेकः 81पृ

**आषाढादित्रये दैवादविधाय पवित्रकम्।**
**लक्षद्वयमघोरस्य जप्त्वा चान्द्रायणं चरेत्।।**

एकस्मिन् संवत्सरे पवित्रोत्सवः लोपः चेत् प्रायश्चित्तं कृत्वा पवित्रोत्सवम् अवश्यम् आचरणीयं भवेत्।

नित्य- नैमित्तिक- काम्य- प्रायश्चित्तकर्मासु चतुर्षु नित्यकर्मण्येव अन्तर्भूतः अयं पवित्रोत्सवः इति शैवकालविवेकग्रन्थः स्पष्टं निर्दिशति। अनेन अयं पवित्रोत्सवः प्रतिवर्षं दोषनिवारणार्थम् अवश्यं आचरणीयः भवतु इति ज्ञायते।

**नित्यकर्मसु अन्तर्भूत एव पवित्रोत्सवः**

आगमशास्त्रेषु पवित्रोत्सवः नित्यपूजायाः अङ्गत्वेन निर्दिष्टः अस्ति। अतः अस्य नित्याङ्गत्वं स्वीकृतम्। नित्यपूजायाः यदा अङ्गत्वं कर्म भवति, तदा तस्य त्यागः न विधीयते।

प्रतिदिनं विधियुक्तानि कर्माणि नित्यकर्म इति व्यवहारः। नित्यकर्म द्विविधं **दैवसिकं वार्षिकं** चेति। दिवसे दिवसे क्रियमाणं दैवसिकं, वर्षे वर्षे क्रियमाणं वार्षिकमिति।

**................नित्याङ्गं प्रोच्यते पुनः।।**
**अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि।**
**पञ्चदश्यां व्यतीपाते सङ्क्रान्तौ चोत्तरायणे।।**
**मासवृद्धौ दिनध्वंसे षडशीतिमुखेष्वपि।**
**रवीन्दुग्रहणे चैव द्विगुणाऽर्चाजपादिकम्।।**
**नित्याङ्गमागमे चोक्तं नैमित्तिकमथोच्यते[11]।।**

- षट्सहस्रकालोत्तरम्

अष्टमी चतुर्दशी पौर्णिमा अमावास्या व्यतीपात सङ्क्रान्ति अयनकाल अधिकमास ग्रहणेत्यादः नित्याङ्गकर्मसु यत् कृतं कार्यं सर्वं द्विगुणं फलं प्रयच्छति।

**नित्योत्सवेन या पूजा तस्यास्संवत्सरोत्सवः** अनेन आगमवाक्येन[12] दैवसिकवार्षिकयोः भेदः नास्ति। वर्षे प्रयुक्तः पवित्रोत्सवः दैवसिकवत् नित्याङ्गमेव।

**विधिच्छिद्रपूरणरूपः असौ ।**
**सर्वपूजाविधिच्छिद्रपूरणाय पवित्रकम्[13]॥**

श्रौताग्निषु आहवनीय- अनवाहार्य- आवसथ्य- सभ्य- गार्हपत्य इति होमकुण्डानि परिकल्प्य च्छिद्रं माभूत् इति धिया अनुदिनं तत्तत् वेदमन्त्राः लोकक्षेमार्थं अग्निष्टोम- अत्यग्निष्टोम- सोमयाग- अतिरात्रादयः यागाः

[11]. शैवकालविवेकः 81पृ
[12]. शैवकालविवेकः 81पृ
[13]. शैवकालविवेकः 81पृ

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(7), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

साङ्गोपाङ्गं समाचरन्ति आहिताग्निपुरुषाः। ज्ञाताज्ञातदोषनिवारणार्थं विधिच्छिद्रपूरणार्थं च नित्याङ्गत्वेन क्रियते अन्वाहार्याग्निहोत्रहवनम्।

तद्वत् श्रौताग्निसदृशमेव साकारपूजनं भवति। तत्र विधिच्छिद्रपूरणार्थं हवनं यथा उद्दिष्टं तथा अत्र आलयेषु नित्यार्चनावैकल्यदोषनिवारणरूपः नित्याङ्गरूप एव पवित्रोत्सवः।

अनेन पवित्रोत्सवोऽयं नित्यङ्गरूपः भवतु इति निगमज्ञानदेशिकशिवाचार्याः सुष्टु सप्रमाणं संसाधितवन्तो अभवन् ।

एकस्मिन् संवत्सरे मन्त्र -द्रव्य -क्रियालोपाः सम्भवति चेत् तेषां दोषाणां निवारणार्थंम् अर्चनलोपपूरणार्थं च पवित्रोत्सवकर्म आचरणीयः।

**पवित्रोत्सवकालः**

**आषाढादित्रिमासाश्शिवमतगदिताः श्रेष्ठमध्याधमास्स्युः**
**पक्षे शुक्ले च कृष्णे भवति शिवतिथिश्चाष्टमी भुक्ति मुक्त्योः।**
**एते ग्राह्ये च भानोरुदयविलयगे चेत्पवित्रं क्रमात्स्यात् [14]।।**

आषाढमासः उत्तमः श्रावणमासः मध्यमः भाद्रपदमासः अधमः। अधिकमासे[15] पवित्रोत्सवः न कर्तव्यः।

आषाढमासे शुक्लपक्षः एवं श्रावणभाद्रपदमासयोः उभयपक्षः योग्यः। भुक्त्यर्थं शुक्लपक्षः मुक्त्यर्थं कृष्णपक्षः आश्रयः।

आषाढमासे बहुल अष्टमी, श्रावणभाद्रपदमासयोः उभयाष्टम्यौ अथवा आषाढमासे चतुर्दशीतिथौ एवं श्रावणभाद्रपदमासयोः उभयचतुर्दश्याम् अपि योग्यःकालः।

अष्टम्यां पवित्रसमर्पणं निर्णयः चेत् स्समम्यां गन्धपवित्रं समर्प्य अष्टम्यां नित्यपूजानन्तरं शुद्धपवित्रसमर्पणं कर्तव्यम्।

त्रयोदश्यां गन्धपवित्रं समर्प्य चतुर्दश्यां नित्यपूजानन्तरं शुद्धपवित्रसमर्पणं कार्यम्। पवित्रसमर्पणे चतुर्दशीतिथिः ग्राह्या इयं विशिष्टा।

**पवित्रोत्सवप्रयोगक्रमः**

सुमङ्गलीभिः स्त्रीभिः कौशेय कार्पासादिभिः द्रव्यैः निर्मितैः द्रव्यैः मालाः कृत्वा ताः संसिद्धीकृत्य यागमण्टपं विनिर्मीय तत्र यागकुण्डानि वेदिकाः होमद्रव्याणि पुष्पाणि चन्दनागरुकर्पूरद्रव्याणि अभिषेकद्रव्याणि च संसिद्धीकृत्य आह्निकं विभज्य कस्मिन् दिने किं कुर्यात् इति मनसि निधाय प्रणालीं परिकल्प्य गणपतिपूजा- पुण्याहवाचन- वास्तुहोम- मृत्संग्रहणपूर्वक अङ्कुरार्पण- यागमण्डपपूजा- अग्निकार्यं- पवित्रपूजा- गन्धपवित्रसमर्पण- पवित्ररक्षा- सर्वासां मूर्तीनां पवित्रसमर्पण- पूर्णाहुति- यागविसर्जन- विशेष आराधन- राजाराष्ट्रग्रामयजमानादीनां रक्षार्थं प्रार्थना

[14]. शैववालविवेकः - 19 श्लो

[15]. शैवकालविवेकः - 86पृ

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:14, Issue:12(7), December, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

इत्यादयः क्रियाविशेषाः पवित्रोत्सवप्रयोगकर्मणि निर्दिष्टाः भवन्ति। एतेषाम् अनुष्ठाने पूर्वापरं विचार्य क्रियानुष्ठानं कार्यं भवतु इति शैवकालविवेकग्रन्थस्य[16] उपदेशसारः।

**उपसंहारः**

विष्णोः सुदर्शनचक्रम्, इन्द्रस्य वज्रायुधं, परमशिवस्य त्रिशूलं, श्रीरामस्य धनुः, परशुरामस्य परशुः यथा रक्षार्थं आयुधानि विद्यन्ते तथा अर्चनक्रियायां सर्वदोषोपशमनाय न्यूनातिरिक्तदोषनिवृत्तिद्वारा अर्चनासाफल्यार्थं शैवाचर्याणां नित्यत्वेन पवित्रोत्सवोऽसौ दिव्यायुधसदृशत्वेन राराजतीति नास्ति विप्रतिपत्तिः।

नित्यपूजायाः अनिवार्याङ्गत्वात् पवित्रोत्सवः अयं नित्यङ्गत्वं वहतीति निश्चप्रचम्।

**शिवास्तु ते पन्थानः सन्तु**

**उपयुक्तग्रन्थाः**

1. **शैवकालविवेकः** - श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपति- 2015
2. **कारणागमः** - श्रीशैलदेवस्थानम्, श्रीशैलम् -1952
3. **क्रियाक्रमद्योतिका** - तालपत्रम् फ्रन्च् इन्स्टिट्यूट् आफ् पाण्डिच्चेरि- 1965
4. **पवित्रोत्सवविधिः** - श्रीशङ्करवेदागमसनातनधर्मसेवाट्रस्ट्, रङ्गापुरम्- 2020

[16]. शैववालविवेकः